# ’प्यारिस्’नगरे संस्कृतदिवसः

"संस्कृतं मूलतः भारतीयताम् आवहदपि विश्वबन्धुत्वसाधकमस्ति, प्राचीनमपि वर्तमानकाले व्यवहारभाषा भवितुम् अर्हति, शास्त्रीयम् अपि लौकिकं ज्ञानं सर्वदा पोषयति इत्यतः पुरातनकालापेक्षया अस्य महत्त्वम् इदानीं समधिकं वर्धितम् अस्ति"--एष विचारः ’प्यारिस्’-नगरे ३० जून्, २०१२-दिनाङ्के शनिवासरे ’भारतभवने’(Maison de l’Inde) तस्य भवनस्य तथा च ‘भारतसंस्कृतिसङ्गम’स्य संयुक्तेन तत्त्वावधानेन इदंप्राथम्येन समायोजितस्य ’संस्कृतदिवस’-समारोहस्य उद्घाटनावसरे भाषमाणेन भारतभवनस्य निदेशकेन डा. विकास सान्यालमहोदयेन अभिहितः।

अपराह्ण ३ वादनतः सायम् अष्टवादनं यावत् प्रचलिते समारोहेऽस्मिन् विविधोपयोगिवस्तूनां देवानां महापुरुषाणां च संस्कृतनामोल्लेखपूर्विका वस्तुप्रदर्शिनी आसीत्, तेषां संस्कृतसम्भाषणपूर्वकं वर्णनं ‘प्यारिस्’नगरे सोर्बोन्-नूवेल्-विश्वविद्यालये संस्कृतस्य अतिथि-अध्यापकरूपेण विद्यमानेन प्रो.गोपबन्धुमिश्रेण विहितम्, तेषां फ्रांसीय-भाषया अनुवादमुखेन ’जान्’ इत्याख्यया प्रस्तुतिरपि विहिता।

सार्धत्रिवादने प्रो. पी.फिलिओजा, श्रीमती वसुन्धरा फिलिओजा, श्रीमती शुभ्रा पाण्डे (भारतीयदूतावासतः), श्रीमती प्रीति सान्याल(भारतभवनस्य सांस्कृतिकमन्त्री), श्रीमती भुवना राव (एयर् इण्डिआ) चेति मिलित्वा दीपोद्दीपनं विहितवन्तः।

ततः परं प्रो. मिश्रेण गीतायाः चिताः विंशतिः श्लोकाः श्राविताः, मार्क् बालोंफा(Marc Ballenfat) तेषां फ्रांसीयम् अनुवादमपि तत्रैव अश्रावयत्।रूपी शाहया मधुराष्टकस्य कतिपयश्रीकृष्णस्तोत्राणां च श्रुतिमधुरा प्रस्तुतिः विहिता । तदनु ’प्यारिस्’-नगरे सर्पिलगत्या प्रवहन्त्याः ’सैन्’ नद्याः स्तुतिम् आश्रित्य प्रो. मिश्रेण स्वरचितं ’सैन्-पञ्चकं’ श्रावितम्।त्वरितं तस्य फ्रांसीयोऽनुवादः प्रो. पी. फिलिओजामहोदयेन विहितः।

समारोहस्य मुख्यम् आकर्षणम् आसीत् ’ ओन्त्वान द सें एक्जुपेरि’(Antoine de Saint Exupery) द्वारा फ्रांसीयभाषया लिखितस्य ’ल पेति प्रांस्’(Le Petit Prince) इत्यस्य पुस्तकस्य प्रो. गोपबन्धु मिश्रेण कृतस्य यः संस्कृतानुवादस्य "कनीयान् राजकुमारः" इत्यस्य चतुर्णां दृश्यानां चतुर्भिः

बालकैः नाट्याभिनयः प्रस्तुतः ।आदित्यः, अथर्व, श्रेया, आयनः इत्येतैः बालैः अभिनीतानि दृश्यानि सकलैः समादृतानि। विश्वस्य १८० भाषासु एतावत्पर्यन्तम् अनूदितमिदं प्रसिद्धं फ्रांसीयं पुस्तकं प्रथमवारमेव संस्कृतेन अनूदितमस्ति ( न तु प्रकाशितमिदमस्ति)।अपरस्माद् ग्रहविशेषात् पृथिवीं प्रति आगतेन 'कनीयसा राजकुमारेण' सह पुस्तकलेखकस्य स्वयं विमानचालकस्य 'सें एक्जुपेरि'-महोदयस्य सहाराख्ये मरुस्थले जातः साक्षात्कारः अत्र वर्णितो विद्यते। विविधेषु ग्रहेषु अटता तेन सरलमतिना राजकुमारेण यथा यथा तत्तद्ग्रहनिवासिभिः राज-श्रेष्ठि-शृगालादिभिः साक्षात्कारो विहित आसीत् तानि दृश्यानि कुशलतया संस्कृतभाषया एतैः बालकैः साभिनयं प्रस्तुतानि, तदर्थं सर्वैः उपस्थितैः भूयो भूयः सभाजिताश्च ते ।

अवसरेऽस्मिन् लैडेन्(नेदरलैन्द्) तः समागतः प्रसिद्धः विद्वान् प्रो. जां हूबेन् (Pro. Jan Houben) 'सौश्रवसपाणिनिशास्त्र-रीतिद्वयपरीक्षा' इति तुलनात्मको विषयः उपस्थापितः। 'इनरिआ'(INRIA, PARIS), प्यारिस्-तः आगतः प्रो. जेरार् उएत्(Pro. Gerard Huet) तथा च हैदरावाद (भारतम्)तः आगता प्रो, अम्बा कुलकर्णी 'संगणीयकं संस्कृतम्' इति विषयं सम्यक् उपास्थापयताम् ।तदनु प्रो. पी.फिलिओजा (Pro. P. Filliozat) 'संस्कृतमाहत्म्यं" वर्णितवान्।

अन्ते ए.एल्. सेजि(A.L. Chezy)-महोदयेन १८३० तमे वर्षे फ्रांसीयभाषया अनूदितस्य अभिज्ञानशाकुन्तलस्य वाचनिकप्रस्तुतिः चतुर्भिः कलाकारैः विहिता। तत्र मध्ये कतिपयश्लोकानां साक्षात् संस्कृतेन प्रस्तुतिः श्रीमत्या वसुन्धरा फिलिओजया तथा च प्रो. मिश्रेण विहिता। चतुर्णां श्लोकानां भरतनाट्यप्रस्तुतिं भामती फिलिओजा अकरोत्।

'प्यारिस्'- नगरे प्रथमवारम् आयोजितेऽस्मिन् समारोहे आद्यन्तम् उपशतं जनाः उपस्थिताः सन्तः संस्कृतभाषायाः महत्त्वं सम्यग् अनुभूतवन्तः भूयः प्रशंसितवन्तः च।